# द्वितीयं प्रकरणम्
# कर्मकाण्डविषयकम्

1. वेदेषु कर्मकाण्डविचार :।

2. ब्राह्मणारण्यकोपनिषत्सु कर्मकाण्डविचार :।

3. सूत्रग्रन्थेषु कर्मकाण्डविचार :।

4. पुराणेषु कर्मकाण्डविचार :।

## 1.वेदेषु कर्मकाण्डविचारः

वेदेषु सर्वे विषयाः समुपलब्धाः भवन्ति। मनुनोक्तं यत् ''सर्वं वेदात्प्रसिद्धयति'' तदनुसारेण वेदे भक्ति–ज्ञान–उपासना–कर्मकाण्ड विषयेऽपि सर्वेषु वेदेषु प्राप्यन्ते, तदत्र कर्मकाण्डविषयविचारः क्रियते। प्रथमे हि को नाम वेदः ?

'वेद' शब्दस्य व्युत्पत्तिः, विद् ज्ञाने धातोः अभवत्। तत्राऽपि विद्ज्ञाने, विद् विचारणे, विद् विचिक्त्सायां वा कर्तुं शक्यते। अनेन ज्ञायते यत् वेदस्य उपयोगः अनेकेषु अर्थेषु भवति। अस्य विषस्य पूर्णनिदर्शनम् मीमांसा –दर्शने प्राप्यते। तत्र मीमांसायां सूत्रमेवमिदमस्ति।–––

''आम्नायस्य क्रियार्थत्वात्।''[1]

अस्मिन् सूत्रे स्वर्गकामो यजेत् इत्यत्र यजेत् इत्यादिविधिद्वारा विधि–विशेषम् स्वीकृत्य कर्मानुष्ठानं प्रति प्रेरणा प्राप्यते। सा तु मीमांसकाः भावना इति कथ्यते। भवितुर्भावनानुकूलः भावव्यापार विशेषः। [2] इत्यादि पदेन ज्ञायते भावनाऽपि द्विविधा भवति।

**1.**शाब्दीभावना।
**2.**आर्थीभावना चेति।

तत्र अनया भावनया प्रेरितः पुरुषः कर्मकलापे (कर्मकाण्डे) प्रवर्तते। तथा च यथा मीमांसाशास्त्रे वेदानां विहितक्रिया कलापमेव अभिधत्ते तत्र वेदवचनानां प्रधानतात्पर्यम् पूर्वोक्तसूत्रेण ज्ञायते। यतोहि यो धर्मः सा वेद विधिरूपा एव। यागादिषु केषामधिकारः इत्यस्मिन् विषये इति विचारः तत्र कृतः यज्ञादिषु मनुष्यस्यैव अधिकरणे शास्त्रार्थमपि तत्र विद्यते। मीमांसासूत्रेषु कर्मकाण्डविषयस्य समारोहरूपेण प्रतिपादनं विद्यते। मीमांसानाम् कर्मकाण्ड प्रतिपादकः श्रुतीनाम् मिथः विरोधपरिहारकारको ग्रन्थः।

कर्मकाण्डविषये मीमांसकानाम् मतमतीव सुदृढं वर्तते। महर्षिजैमिनिना द्वादशलक्षणीनामके ग्रन्थे अस्य विषयस्य शास्त्ररीत्या विवेचनमस्ति। अस्य ग्रन्थस्य अनेकै विद्वदभिः भाष्यं लिखितम्। यथा शवरस्वामी, कुमारिलभट्टः, प्रभाकरभट्टः इत्यादयः।

तेन स्पष्टीकृतम् – देवता मन्त्रमयी न विग्रहवती।
क्रियापरः सर्वे वेदाः।
स्वर्गः एव सुखप्राप्तिः।
कर्मणा मोक्षः।
क्रियान्विते शब्द शक्तिः।

आख्यातवादाः इत्यादयाः सिद्धान्ताः मीमांसकानाम। वेदस्य बहवः मन्त्राः कर्मकाण्डपरकाः सन्ति। वस्तुतः विधिप्रतिपादने एव वेदस्य मुख्यं तात्पर्यम् अस्ति। मीमांसकानां मते कर्मचतुर्विधं भवति। यथा ––––

1. काम्यकर्म।
2. प्रतिसिद्धकर्म।
3. नित्यकर्म।
4. नैमित्तककर्म च।

**काम्यकर्म :––**

कामनाविशेषमुपद्दिश्य क्रियमाणं कर्म काम्यकर्म भवति। यथा– स्वर्गकामो यजेति इति।

**प्रतिसिद्धकर्म :–––**

निषिद्धं हि प्रतिसिद्धम् भवति। कलंयं न भुंजीत्।

**नित्यकर्म :–––**

प्रत्यवायसाधनानि संध्यावंदनादिकम् नित्यकर्मेति।

**नैमित्तककर्म :———**

विशेषकारणमुद्दिश्य निमित्तरूपेण क्रियमाणं कर्म नैमित्तकं भवति।

अस्मिन् विषये मीमांसकानां मौलिकं तत्त्वम् उद्भाव्यते। वेदस्य कर्मकाण्डद्वारा फलसिद्धिः भवति, इति उद्घोषः वर्तते। अभिनवगुप्तपादाचार्येण तंत्रवार्तिके लिखितं यत् –––

यागादेव फलं तद्धि शाक्तद्वारेण सिद्धयति।
सूक्ष्म शक्त्यात्मकं वा तत् फलमेवोपजायते।।[3]

वेदेषु यज्ञयागादिनाम् बहवाः मन्त्राः यजुर्वेद रूपेण प्राप्यते। यतोहि गद्यांशीयंजूषी। (अयं यजुर्वेदः यज्ञयागादि क्रियाकलापामुरोधेन मन्त्र धरित्वात् अन्वर्थनामास्ति। देव –पूजा – संगतिकरण –दानादि– अर्थकाद्– यजते निष्पन्नः यजुर्वेदः।

चतुर्षुवेदेषु लक्षपरिमिताः मन्त्राः सन्ति। तत्राऽपि असीति सहस्रमन्त्राः कर्मकाण्डपरकाः सन्ति।

षोडशसहस्रमन्त्राः उपासनापरकाः।

चतुस्रसहस्रमन्त्राःमोक्षपरकाः सन्ति।

अनेन ज्ञायते वेदेषु कर्मकाण्डपरका मन्त्राः अधिकाः सन्ति। सोऽयं यजुर्वेदः 1975 मन्त्रात्मकः अस्ति। तत्र चत्वारिंशतअध्यायाः सन्ति।

**प्रथमेऽध्याये** – दशपूर्णमासौ

**द्वितीयेऽध्याये** – पिण्डपितृयज्ञः।

**तृतीयेऽध्याये** – अग्निहोत्रम्, चातुर्मास्येष्टिः।

**चतुर्थादारभ्य अष्टमऽध्याय** पर्यन्तम्– अग्निेष्टिहोम, यज्ञविधानम्, सोमयज्ञः चर्चा अस्ति।

**नवमेऽध्याये** – वाजपेयः, राजसूयश्च यज्ञः वर्तेते।

**दशमेऽध्याये** –– श्रौत्रामणिः।

**एकादशतः अष्टादशाऽध्याय** पर्यन्तम् – अग्निचयनम्, रुद्रः, शतरुद्रियम्, वसोर्धारा इत्यादयाः सन्ति।

एकोनविंशतितः एकविंशतितमेऽध्याये–सोमसंपादनविधिः वर्तते। एकविंशतितः पंचविंशतिपर्यन्तम्–अश्वमेधप्रसङ्गः वर्तते।

पुनः शेषेषु अध्यायेषु पुरुषमेधयज्ञः सर्वमेधयज्ञः, पितृमेधयज्ञश्च अस्ति।[4]

चत्वारिंशततमोऽध्यायः – ईषावास्योपनिषदरूपेण सन्ति।

एवं प्रकारेण शुक्लयजुर्वेदे कर्मकाण्डविषयकाः सन्दर्भाः सन्ति। अन्येषु वेदेषु यथा – ऋग्वेद –अथवर्वेद –सामवेदेषु च अपि कर्मकाण्डपरकं सन्दर्भमपि द्रष्टुं शक्यते। यथा–– वृत्तान वृतानुष्ठामपि तत्र प्राप्यते।

व्रतेन दीक्षामाप्नोति दीक्षामाप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते।।
पुनन्तु मा देव जनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा।।[5]

अनेन ज्ञायते यत् वेदेषु कर्मकाण्डविषयकाः प्राधान्येन प्राप्यन्ते।

**वेदेषु कर्मकाण्डविधिः ––**

सर्वेषां मन्त्राणां समुपयोगत्वं सिद्धत्वं च छन्दसां विवेचनादितत्वम् इत्यादिकं सर्वेषुवेदेषु वेदमन्त्रेषु वर्तते। सकलाः यज्ञाः वेदाधारिताः सन्ति। कथ्यते यत् प्रत्येकमन्त्राः यज्ञसम्बन्धी अस्ति। समेषां सर्वेषां समुपयोगः कर्मकाण्डे पौरोहित्ये वा भवत्येव।

वेदानां मुख्यविषयत्वमित्थमस्ति।

1. ऋग्वेदः = इन्द्रादीनां स्तवनविषयकः।
2. यजुर्वेदः = यज्ञविषयकाः विषयाः
3. सामवेदः = सामगीतिः अर्थात् संगीतप्रधानः।
4. अथवर्वेदः= अभिचारक्रियात्मकश्च औषधीयज्ञानयुतः। इति

यथा मन्त्रः –– तत्वायामि –––––––– प्रमोषिः।।

अत्र अस्य मन्त्रस्य ऋषिः वर्तते शुनःशेपः। अस्य मन्त्रस्य छन्दः त्रिष्टुपछन्दः। अस्य मन्त्रस्य देवता भगवान् जलाधिनाथः वरुणो विद्यते चास्य मन्त्रस्योपयोगत्वं विद्यते वरुणावाहनम् इति।

वयमत्र कर्मकाण्डविषयपूरकान् मन्त्रान् सकार्य्यान् विवेचयामः। तेषामुपयोगेनैव यज्ञक्रियाः विधिपूर्णाः परिसमाप्ताः भवन्ति।

**विविधमन्त्राः –**

| क्रमसंख्या | मन्त्राः |
|---|---|
| 1 | भस्मधारण मन्त्रः |
| 2 | रुद्राक्षधारणमन्त्रः |
| 3 | अभिमन्त्रणमन्त्रः |
| 4 | पवित्रीधारणमन्त्रः |
| 5 | आयुष्यमन्त्राः |
| 6 | तिलकमन्त्रः |
| 7 | गन्धोपयोगिमन्त्रः |
| 8 | अक्षतोपयोगिमन्त्रः |
| 9 | आशीर्वादमन्त्राः |
| 10 | मुखविमार्जनमन्त्राः |
| 11 | गायत्र्यावाहनमन्त्राः |
| 12 | षडऋतुमन्त्राः |
| 13 | फलापयोगिमन्त्रः |
| 14 | वसोर्द्धारामन्त्रः |
| 15 | शिखाबन्धनमन्त्रः |
| 16 | देवावाहनमन्त्राः |
| 17 | देवविसर्जनमन्त्रः |

एवं प्रकारेण, वेदेषु अस्माकं कर्मकाण्डक्रियाकलापात्मकाः मन्त्राः सन्ति। पौरोहित्यस्य प्रत्येकयज्ञानां शान्तिककर्मणां पौष्टिक कर्मणाच्च विधानं सर्वे मन्त्रैः सम्पन्नं भवति।

भगवता याज्ञवल्क्येन मन्त्राणां क्रमोल्लेखनं कृतकानां प्रत्येकानां वेदानां शाखाः सञ्जाताः प्रत्येकशाखानां सविस्तारः महर्षिभिः च शिष्यैः प्रशिष्यैः कृतः, तस्मादेव शाखाभिन्नत्वात् क्रियाभिन्नत्वं जायते, नान्यो भेदोऽस्त्यत्र यथा कृष्णयजुर्वेदीयानां कृते श्रावणीप्रयोगः पृथग्भवति च शुक्लयजुर्वदीयविप्राणां कृते वाजसनेयिशाखा विषयकाः क्रियाकलापाः सूचितास्सन्ति। तत्सर्वं सविस्तारम् '' आहनिकसूत्रावलिः'' नामके ग्रन्थे वाराणसी निवासिभिः विद्वदिभिः वर्णितं, तदवश्यमेव दर्शनीयम् ।

**वेदेषु ज्योतिषविवेचनम् :–**

वेदाः ज्योतिषाधारितासन्ति कारण यत् प्रत्येकाः यज्ञाः वेदाधारिताः भवन्ति तथैव ज्योतिषाधारिताः भवन्ति कारणं यत् प्रत्येकेषु यज्ञेषु मुर्हूतावबोधनमश्यमेव करणीयं भवति।

यथा हि यज्ञानां विभागशः मास, वासरः, योगः, काल, आदिविषयकानां ज्ञानं मुर्हूतावलोकनेनैव भवति। मुर्हूत दर्शनं ज्योतिषशास्त्रान्तर्गतमेव भवतीति।

**वेदेषु सूर्यचन्द्रोत्पत्तिवर्णनम् :–**

साम्प्रतं सम्पूर्णे जगति जलंविहाय किमपिनासीत्। अनन्तरं सहस्राक्षं, सहस्रचरणः, सहस्रशिरोवान् विराट पुरुषो जातः। विराटपुरुषस्य सर्वेषु भिन्नेषु–भिन्नेषु अंगैः एकैकलोकस्य कल्पना भवति, यथा––पाताले मे तस्य हि पादमूलम्–इत्यादिकं श्रीमद्भागवते प्रायश्चित्तमस्ति।

अनन्तरं विराटपुरुषस्य द्वयोः चक्षुषोः एकेकचक्षुषः ÿमशः चन्द्रश्च सूर्यो बभूव। यथा हि शुक्लयजुर्वेदे ––

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत्।
श्रोत्राद्वायुश्चप्राणमुखादिग्नरजायत।।[6]

अनन्तरं चन्द्रमसः सप्तविंशतिपत्न्यः बभूवुः। तस्य पुत्रः बुधः। पृथिव्याः सुतः भौमः।

अनया रीत्या सर्वेषां नवग्रहाणामुत्पत्तिदर्शनं वर्तते पुराणेषु। वेदेषु नवग्रहाणामधिदेवतानां च प्रत्यधिदवतानां नामानि, स्वरूपच्च मन्त्राः प्राप्यन्ते।

यथा नवग्रहदेवतानां सत्ता ज्योतिषान्तर्गता वर्तते, परन्तु तेषां स्तवनं वेदेषु अस्ति। अत्र नवग्रह मन्त्राः दर्शयामि।

**सूर्यमन्त्रः**

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंच ।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्।।[7]

**चन्द्रमन्त्रः**

ॐ **इ**मं देवा असपत्न॑ सुवध्वं महते क्षत्राय
महते ज्येष्ठयाय महते जानराज्यायेन्द्रियाय।[8]

**भौममन्त्रः**

ॐ अग्निर्मूर्द्धा दिवः ककुत्पत्तिः पृथिव्या अयम्।
अपा॑ रेता॑ सि जिन्वति।।[9]

**बुधमन्त्रः**

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वष्टिापूर्ते सगं सृजेथामयं च।
अस्मिन्नधस्थे अध्युत्तरसिमने विश्वे देवा यजमानश्च सीदत।।[10]

**गुरुमन्त्रः**

ॐ वृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतमज्जनेषु।
यद्दीदयच्वस ऋतप्रजात तदस्समासु द्रविणं धेहि चित्रम्।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा।।[11]

**शुक्रमन्त्रः**

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः।
ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमनधस इन्द्रेयन्द्रियमिदं पयोऽमृतं मधुः ।[12]

**शनिमन्त्रः**

ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये।
शं योरिभि स्रवन्तु नः।।[13]

**राहुमन्त्रः**

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृत्ता।।[14]

**केतुमन्त्रः**

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः।।[15]

इत्यादयाः ग्रहाणां मन्त्राः वैदिकाः शुक्लयजुर्वेदीया सन्ति। वेदेषु इदमेव ज्योतिषदर्शनं वर्तते। वेदानां पौरोहित्यविषयत्वात् ज्योतिषशास्त्रं वेदेषु अल्पतमं–अल्पतरं वर्णितामस्ति।

# सन्दर्भ–ग्रन्था:

---

1. मीमांसा – 1/2/1
2. न्याय मीमांसा प्रकाश
3. तन्त्रवार्तिक
4. शुक्लयजुर्वेद. 19/2/1
5. .यजुर्वेद – 19/39
6. शुक्लयजुर्वेद
7. नित्यकर्म–पूजाप्रकाश
8. नित्यकर्म–पूजाप्रकाश
9. नित्यकर्म–पूजाप्रकाश
10. नित्यकर्म–पूजाप्रकाश
11. नित्यकर्म–पूजाप्रकाश
12. नित्यकर्म–पूजाप्रकाश
13. नित्यकर्म–पूजाप्रकाश
14. नित्यकर्म–पूजाप्रकाश
15. नित्यकर्म–पूजाप्रकाश

## 2.ब्राह्मणारण्यकोपनिषत्सु कर्मकाण्डविचारः

एते त्रयः ग्रन्थाः वेदविवेचनार्थम् वैदिकतत्वचिन्तनाय ऋषिभिः रचितास्सन्ति। एते त्रयः ग्रन्थस्वरूपाः ज्ञानस्य पराकाष्ठामुत्तिष्ठन्ते। यथा चात्र आध्यात्मिकतायाः पराकाष्ठायाः वर्णनं महर्षिभिः गीयते।

ईशावास्यमिदं सर्वं यत् किञ्चिज्जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।[1]

यत् जगत्यामस्ति तत्सर्वम् ईशावास्यमस्ति। ईश्वरस्य एव ऐश्वर्यमस्ति सकलं जगत्। इत्येवोपनिषदां सारत्वम् अस्ति। ब्राह्मणग्रन्थाः कथ्यन्ते। अरण्ये –ब्राह्मणवासिनां महर्षिणां जीवनं, तद्विषयकं ज्ञानम् आरण्यकेषु ग्रन्थेषु वर्तते। केवलम् ईश्वरानुभूतिरेव उपनिषदां प्रमुखः विषयोस्ति।

ईश–केन–कठ–प्रश्न–माण्डूक्य–तैत्तरीय–बृहदारण्यक प्रभृतिषु सर्वासु उपनिषत्सु केवलमाध्यात्मिकं वेदान्तनिष्पन्नं ज्ञानमेव प्रायश्चित्तमस्ति ऋषिभिः।

अत्र सात्विकविधेः प्रशंसा चाभिचारविधीनां निन्दा वर्तते।

कर्मकाण्डविषयेऽस्मिन् इदमेव तद्विषयाऽीभूतं ज्ञानं वर्तते। अन्धः तमः प्रविशन्ति, येऽविद्यामुपासते।।

ब्राह्मणग्रन्थेषु कर्मकाण्डमन्त्राः सन्ति। शतपथब्राह्मणग्रन्थे यज्ञविषयकाः विधिविषयकाः पुण्याहवाचनविषयकाः आशीर्वादमन्त्राः च प्राप्यन्ते।

महर्षिपतञ्जलिना व्याकरणमहाभाष्ये लिखितं यत् – ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोऽध्येयो ज्ञेयश्च' इति अनेन ज्ञायते षडङ्गैः अपि वेदवदेव ब्राह्मणानां महत्वम् यथा वेदस्य तथैवास्ति। यतोहि –वेदब्राह्मणर्योनामधेयं इति सायणाचार्येण उक्तं। यागादि विधिः–अनुस्यूतानाम ब्राह्मणनां स्वरूपं अस्ति।

ब्राह्मण शब्दः अत्र ग्रन्थवाची वर्तते। ब्राह्मणेन प्रोक्तं इति ब्राह्मणम्। मन्त्रभागादिरक्ते ''शेषेब्राह्मण शब्दः इति जैमिनीमहर्षिणा उक्तम्। ब्राह्मणानां विषयः यज्ञादि एव। प्रतिवेदस्य ब्राह्मणग्रंथेषु कर्मकाण्डस्य विवेचनं प्राप्यते। त्रिविधं ब्राह्मणं भवति। यथा ———

1. विधिरूपम्।
2. अर्थवादरूपम्।
3. उभयविधलक्षणम्।

तत्र इष्टसाधनतः विधिः। विधयः अपि उत्पत्तिः—अधिकारः—विनियोगः —प्रयोगयोगविधिश्च इति चतुर्विधा।

शुक्लयजुर्वेदस्य शतपथब्राह्मणे शताध्यायाः सन्ति। तत्र चतुर्दशकाण्डानि सन्ति। तत्राऽपि

नवकाण्डेषु यज्ञविवरणं वर्तते।
दशमे अग्निरहस्यं वर्तते।
एकादशे —अग्निचयनम्।
द्वादशेऽध्याये — प्रायश्चित्तम्।

त्रयोदशे —नरमेध, अश्वमेधयोः विवरणम् अपि च दुष्यन्त— शकुन्तला —भरतादिनाम् आख्यानम्, काशिराज —परीक्षितपुत्र —जन्मेजयादिनामोल्लेखः अस्ति। एवं प्रकारेण ऋग्वेदस्य कौशीतकी ब्राह्मणे अग्निहोत्रादि नाम वर्णनम् अस्ति।

सामवेदस्य सर्वेषु ब्राह्मणग्रन्थेषु कर्मकाण्डविषयकं उपलभ्यते। अथर्ववेदस्य गोपथब्राह्मणेऽपि अनेके विषयाः निर्दिष्टाः सन्ति। अत्र 135 प्रपाठकाः 258 कण्डिकाः सन्ति। पञ्चमे प्रपाठके यज्ञादीनां विवेचनं

उपलभ्यते। ब्राह्मणग्रन्थानां महत्वं यज्ञयागादिषु अत्यन्तं वर्तते। अत्र कानिचित उदाहरणानि प्रस्तूयन्ते –––

यज्ञो वै श्रेष्ठतमं कर्म।[2]

सर्वात्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति।[3]

विद्युद्धीमां वृष्टिमन्नाद्यां सम्प्रयच्छति।[4]

एतद्वाचश्छिद्रं यदनृत्तम्।[5]

यज्ञो विष्णुः।[6]

यज्ञो वै प्राणः स वातः।[7]

तद् विश्वेदेवा अब्रुवन वयं मा एतत् प्रथयिष्यामो भागो नोऽस्विति तद्भ्रम एव वैश्वदेवः।[8]

यज्ञेन यजेत्।[9]

यज्ञेन यजते।[10]

यत्रैतेन यज्ञेन यजन्त।[11]

वस्तुतः ब्राह्मणानामपि वेदत्वम् अंगीकारः क्रियते।

ब्राह्मणग्रन्थेषु कर्मकाण्डविषयकं विवरणं प्रायेण सर्वत्र दरीदृश्यते।

अथर्ववेदस्य गोपथब्राह्मणे यज्ञयागादिविधिविधाननियमानां विशदं विवरणम –विविधोपदेशाः च सन्ति।

## आरण्यकानि :–

ब्राह्मणभागस्य परिशिष्टरूपेण आरण्यकानि सन्ति। एतानि गद्यपद्यमयानि सन्ति। आरण्ये अध्ययनात् पाठ्यत्वात् च आरण्यकं कथ्यते। आरण्यकेषु वर्णाश्रमधर्माचाराः याज्ञिकरहस्यानां च मीमांसा अस्ति। प्रतिवेदस्य आरण्यकानि भवन्ति। ऋग्वेदस्य कौशीतकी आरण्यकं तत्र शुनःशेष–अहिल्या–खाण्डव–कुरुक्षेत्र–मत्स्य– पांचाल –विदेहादीनां उल्लेखः प्राप्यते।

ऐत्तरेयारण्यके यज्ञयागादीनां महाव्रतानां प्रातरमध्यान्दिनादीनाम् कर्माणि विवेचितानि सन्ति। तथैव सामवेदस्य यजुर्वेदस्य च आरण्यकग्रन्थेषु यज्ञविषयाः प्राप्यन्ते। अथर्ववेदस्य एकमपि आरण्यकं नोपलभ्यते। यथा –– गृहस्थाश्रमीनां यज्ञयागादिविवरणं ब्राह्मणग्रंथेषु उपलभ्यते तथैव वानप्रस्थाश्रमिणां यज्ञादि महाव्रतानां अग्निहोत्राणां च विशदंविवरणं एतेषु आरण्यकग्रन्थेषु उपलभ्यते। इति।

**उपनिषदः –**

उपनिषद नाम् वेदान्तविद्या। अत्र चतुर्वर्गफलप्राप्त्यर्थम् यत्नं विविच्यते। प्रतिवेदानां उपनिषदः सन्ति। प्रायेण शताधिकाः उपनिषदाः सन्ति। किन्तु प्राधान्येन दश उपनिषदाः स्वीक्रियन्ते। उपनिषत्सु कर्मकाण्डविषयाः नैवोपलभ्यन्ते। यत्र–तत्र सन्दर्भः प्राप्यन्ते। यथा –छान्दोग्योपनिषदि, वृहदारण्यकोपनिषदि च सांकेतिकरूपेण कर्मकाण्डविषयः उपलभ्यन्ते। प्रायेण दिव्याः उपदेशाः अत्र प्राप्यन्ते। सारांशेन कथयितुं शक्यते यत् उपनिषदां विषयः मोक्षपरकः अस्ति।

एवं प्रकारेण वैदिकसाहित्ये ब्राह्मणानां आख्यानानां उपनिषदां च महत्वम् विद्यते। विशेषरूपेण कर्मकाण्डविषयिकी चर्चा ब्राह्मणेषु आरण्यग्रन्थेषु च द्रष्टुम शक्यते। यज्ञयागादिनां कर्मकाण्डविषयकानाम् विविधाः नियमाः एतयोः ग्रन्थयोः एव उपलभ्यन्ते। एतेषां ग्रन्थानां अद्यापि वैशिष्ट्यम् महत्वम् च अस्ति। ब्राह्मणग्रन्थानां उपरि सायणाचार्यस्य भाष्याणि प्राप्यन्ते। वस्तुतः यज्ञयागादिनाम् बोधकानाम् वेदार्थप्रतिपादकवाचकानां संग्रहः एव ब्राह्मणग्रन्थाः आरण्यकग्रन्थाश्च सन्ति। अद्यापि कर्मकाण्डविषये ये निर्णयाः सन्ति ते ब्राह्मणादिषु ग्रन्थेषु एव उपलभ्यन्ते।

## सन्दर्भ–ग्रन्थाः


1. ईशावास्योपनिषद–1
2. शत.– 1/1/1/5
3. शत.– 2/3/1/6
4. ऐत.– 2/41
5. ताण्ड्या.–8/6/13
6. शत.–1/3/3/9
7. शतपथ.
8. गो. ब्रा. उत्तर–1/17
9. गोपथ ब्रा.
10. गोपथ ब्रा.
11. गोपथ. ब्रा., उत्तर–12/6

## 3 सूत्रग्रंथेषु कर्मकाण्डविचार :

यदा वेदानां चर्चा विद्यते तदा इयमवधारणा उपस्थापिता भवति। –

तेषामृग्यत्रार्थवशेन पादव्यवस्था।[1]
गीतिषु सामाख्याा।[2]
शेषे यजुः।[3]

अनेन ज्ञायते यत् वेदसंहिताः चतस्रः सन्ति। संहिताग्रन्थेषु कर्मकाण्डविषयः अनेकविधरूपेण दृश्यते–––

अत्र चत्वारो वेदविषयाः सन्ति, विज्ञानकर्मोपासनाज्ञानकाण्ड –भेदात्।[4]

अनेन ज्ञायते संहिताग्रंथेषु यज्ञयागादिकम् वर्णनं अनेकेषु स्थलेषु प्राप्यते। चतुर्णाम् वेदानां विषयविवेचनं अतीवदुष्करमस्ति। तथापि समासेन इदं कथयितुं शक्यते यत् संहिता ग्रन्थेषु कर्मकाण्डस्य अनेकानि उदाहरणानि विविधेषु स्थलेषु उपलब्धानि सन्ति।

वेदानां भाषा अतिकठिना वर्तते। तदर्थानाम् अवबोधनाय ब्राह्मणग्रन्थाः आरण्यकग्रन्थाः सूत्रग्रन्थाश्च सन्ति। सूत्रग्रन्थेष्वपि अनेके भेदाः प्राप्यन्ते। तत्र गृह्यसूत्राणां कर्मकाण्डविषये अतीवोयोपगिता संभाव्यते यतोहि नाम्ना एव ज्ञायते यथा––गृह्यकर्माणि गृह्याहितो इति गृह्यः अत्र कर्तव्यानि यानि कर्माणि सन्ति यथा नित्याग्निहोमादीनि। तदंगभूतानि अग्न्याधानादीनि च उपदेश्यामः, इति प्राप्यते।[5]

अत्र वर्णाश्रमधर्माधारेण कर्मणामुपदेशः निर्दिष्टः। एवं प्रकारेण श्रौत्रसूत्रेषु, शुल्बसूत्रेषु च यज्ञविषयकाः सन्दर्भाः अनेकस्थलेषु उपलभ्यन्ते। यद्यपि तत्र सांकेतिकरूपेणैव विषयाः दृढीकृताः क्रियन्ते। विशेषणरूपेण निर्देशनम्

परवर्तीषु ग्रंथेषु द्रष्टुं शक्यते। यथा सूत्रग्रन्थोपरान्ते स्मृतिग्रन्था प्रादुरभूता जाताः ।

गृहस्थादिनाम् नित्यनैमित्तकानां कर्मणां उपदेशः अस्ति। यज्ञादिपरकानाम् ये सन्दर्भाः तेऽपि सूत्रग्रन्थादेव तत्रोपस्थापिताः। अत्र सूत्रग्रन्थेषु के–के विषयाः प्राप्यन्ते तेषां समासेन उपस्थाप्यन्ते। यथोक्तं पूर्वमेव वेदा›षु समस्तानाम›ानामं एकमैकं महत्वमस्ति। तथापि विषयदृष्ट्या वैशिष्ट्यं सर्वस्यैव।

कल्पसूत्रस्य भेदत्रयम्, यथा––

1.श्रौतसूत्रम्।
2.गृह्यसूत्रम्।
3.धर्मसूत्रम् चेति।

वेदविहितानां श्रुतिप्रतिपादकानां यज्ञया विधिविधानानाम् विवरणं ये ग्रन्थाः क्रियते तदेव सूत्रग्रन्थाः सन्ति।

श्रुतिमूलकत्वात–श्रौतसूत्राणि कथ्यन्ते।

गृहाश्रमिणां जन्मतः मृत्युपर्यन्ताः ये संस्काराः सन्ति अपि च कर्तव्यविशेषाः निर्दिशन्ति तेषां समेषां विवेचनं गृह्यसूत्रेषु उपलभ्यन्ते। सूत्रग्रन्थाः पारमार्थिकः–सामाजिकः–राजनीतिविषयकाः –धर्मविषयकाश्च सन्ति। एतेषु सूत्रग्रन्थेषु गृह्यसूत्राणां अतीव वैशिष्ट्यं स्वीक्रियते।

सूत्रग्रन्थाऽपि प्रतिवेदानां भवन्ति। ऋग्वेदस्य आश्वलायनसूत्रे कर्मकाण्डविषयाः यज्ञयागादीनां विवेचनं चास्ति।

शुक्लयजुर्वदस्य पारस्करगृह्यसूत्रे नित्यनैमित्तक विषयादारभ्य यज्ञादि –विषयाः तेषां निर्णयाश्च तत्र उपलभ्यन्ते।

सूत्रग्रन्थेषु न केवलं गृह्यकर्माणि निर्दिष्टानि अपितु बहूनि अभिचाराणि कर्माण्यपि वर्णितानि। यज्ञयागादयः अत्र यावन्तः विवृताः तावन्तः गृहमेधिनाम् कर्तव्यानि सन्ति। यद्देवान् उद्दिश्य जुहेति सः देवयज्ञः कथ्यते। यत् पितृन् श्रद्धया अर्चति तर्पयति च स पितृयज्ञः कथ्यते। यत् भूतानि उद्दिश्य भूमौ बलिं उपहरति स भूतयज्ञः इति। यत् ब्राह्मणानां अतिथिश्च संस्करोति सः अतिथिः यज्ञः। तत्रापि ब्रह्मयज्ञः स्वाध्यायप्रधानत्वाद् इति विषयाः सूत्रग्रंथेषु प्राप्यन्ते।

गोभिलगृह्यसूत्रे यथा विषयाणां विवेचनं तथैव अन्येषु ग्रन्थेष्वपि विषयाः प्राप्यन्ते। तत्र प्रतिपाद्यविषयाः सन्ति ---

1. नित्यहोमकालः।
2. ब्रह्मयज्ञविधिः।
3. यज्ञकर्माणि।
4. दर्शपौर्णमासयज्ञः।
5. पिण्डपितृयज्ञः।
6. वास्तुयागः।
7. वास्तुनिर्माणकर्म।
8. ब्रह्मवर्चस्वकर्म।
9. स्नातकविधिः।
10. गोपालनविधिः।
11. नवयज्ञः।
12. होमपूर्वकृत्यानि च।

एते सर्वे विषयाः सूत्रग्रन्थेषु महर्षिभिः निगदिताः। गृह्यकर्मणां, धर्मकर्मणां, यज्ञकर्मणां च विवेचनं सूत्रग्रन्थेषु बहुविधरूपेण प्राप्यन्ते।

# 3 सूत्रग्रंथेषु कर्मकाण्डविचार :

---

1. मीमांसा दर्शन– 2/1/35
2. मीमांसा दर्शन–2/1/26
3. मीमांसा दर्शन–2/1/37
4. ऋ.भाष्य–भूमिका,–सायणाचार्य, पृ.–283
5. गोभिल गृह्यसूत्र–1/1

# 4.पुराणेषु कर्मकाण्डविचार :

**पुराणेषु कर्मकाण्डविवेचनम् –**

कर्मकाण्डविधिरपरनामा पौरोहित्यम् इत्यभिधीयते। अत्र पुरोहितानां धर्म पारोहित्यम्–इति व्युत्पत्या " तस्य धर्म्यम्" इति पाणिनेः तद्धितसूत्रेण "पौरोहित्यम्"[1] इति शब्दः सुसिद्धः यथा पणस्य धर्मः पण्यं तथैव पुरोहितानां धर्मः पौरोहित्यम् इति सिद्धम्। पौराहित्यम् अपि द्विविधम्। यथा ––

1.सात्विकविधिः पौरोहित्यम्।

2.अभिचारविधिः पौरोहित्यम्।

सात्विकेषु यज्ञादीनां ग्रहणं भवति। अभिचारेषु कर्मसु तामसविधयः स्वार्थसिद्धयः बन्धनमुच्चाटनादीनां ग्रहणं भवति। अत्र प्रायः सात्विकाः क्रियाकलापाः वर्ण्यन्ते।

पुराणेषु महत्त्वपूर्णानां विधिविधानानां विवेचनमत्र प्रारभ्यते मया। सर्वप्रथमं "कृष्णस्तु भगवान् स्वयम्" इति वाक्यं स्मारं–स्मारं भागवतमहापुराणमाश्रित्य विवेचन प्रारम्भं क्रियते। यथा हि महतां गणना अग्रे भवति। इदं पुराणमपि महापुराणमावतिष्ठते। सर्वेषु पुराणेष्वति। यथा हि ––

श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं
यस्यां पारमहंस्यमेवममलं ज्ञानं परं गीयते।
यत्र ज्ञानविराग भक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृन्वन् प्रपठन् विचारणरो भक्त्या वमुच्येन्नरः।।[2]

अत्र किं नास्ति? इति कवयः मुहुः विचारयन्ति। तथैव मात्स्य वैष्णव–ब्राह्म–आग्नेय+पद्म–नारद–मत्स्यादिषु पुराणेष्वपि सर्वं ग्रथितमस्ति भगवता व्यासेन। विषयवर्णनं दृष्टया एव कल्पनातीतं ज्ञानं भगवतः

वेदव्यासस्य भवेदिति सूच्यते। अत्र पुराणानां केषाञ्चिदशांना वर्णनं अहं विस्तारपूर्वकं करिष्यामः।

**<u>श्रीमद्भागवते वर–(पुरुष) प्राप्तिविधिः –</u>**

विधिरयं वर्तते सुविख्यातः। पुराणेषु कन्यानां कृते स्वाभीष्टपुरुषप्राप्तेश्च पुरुषाणां कृते योग्यकन्याप्राप्तेरपि विधयः सान्ति। अत्र श्रीकृष्णचरिते ''कात्यायनी व्रतविधिः'' वर्तते। विधिरयं गोपीभिः समुपासितः। गोप्यः श्रीकृष्णं स्मारं–स्मारं यमुनातटस्थायाः देव्याः कात्यान्याः स्तवनमित्थं कुर्वन्ति। यथाहि काच्चित् पुण्यं समर्पयन्ति, काच्च्त् सौभाग्यद्रव्यं यच्छन्ति, काच्चित् जलाभिषेकं प्रकुर्वन्ति च प्राथयन्ति। यत्––

कात्यायनि महामाये महायोगिन्यधीश्वरि।
नन्दगोपसुतं देवि पतिं मे कुरुते नमः।। [3]

अत्र देव्याः कात्यायन्याः स्तवनं कृत्वाकात्यायनीं प्रार्थयन्ति गोप्यः यत् अस्मभ्यः कृष्णमेव पतिस्वरूपेण प्रयच्छेत् इति। अत्र ज्ञापनीयमिदं वर्तते यत् अनेन स्तवनेन याः याः कन्याः कात्यायनीं महायागिनीं समुपास्यन्ते ताभ्यः योग्य–वरप्राप्तिः कात्यायनीवर प्रसादाच्च भवत्येव न संशयः।

अपरं विधिरयं बहुश्रुतः वर्तते विवाहाय। रुक्मिणीपत्रस्य पाठनाऽपि पुरुषभ्यः योग्यकन्याः प्राप्तिः भवति च कन्याभ्यः योग्य–वरप्राप्तिश्च भवति–इति अनेकेषामात्मानुभूतिः। यथा रुक्मिणी भगवन्तं श्रीद्वारकेशं सन्देशं प्रेषयति यत्

श्रुत्वा गुणान् भुवनसुन्दरनिर्भरां ते
निर्विश्य कर्णेविवरैर्हरतरर्तोऽऽतापम्।

इत्थं दिव्यादित्यस्तवनप्रसादेनाऽपि विवाहविषयकं समसनं सम्प्राप्तिश्च स्यादिति। श्रीमदभागवतं विहायान्येषु पुराणेष्वपि काममन्त्रोपासनाः चापरे विधयः सम्प्राप्यन्ते। पुष्पादिभिः समभिमन्त्रप्रयोगास्सन्त्यन्यपुराणेषु परन्तु तेषां प्रयोगााां विवेचनं वयमन्यत्र कर्मः।

**श्राद्धविधानम् :——**

श्रद्धया दीयते पितृभ्यः हव्य–कव्यदानमननेति श्राद्धम्। आश्वेऽसिते सर्वे पितृतर्पणाय श्रााद्धकर्मणि कुर्वन्ति। गया–प्रयाग–नर्मदातटादिषु तीर्थेषु श्राद्धस्य सविशेषं माहातम्यं वर्णितमस्ति पुराणेषु। श्रीमद्भागवतस्य पच्चदशाध्यायतः समारभ्य एकोनविंशति अध्यायपर्यन्तं महत्वपूर्णं विधानं वरीवर्तते एव।

सूर्यमण्डले मरीचिगर्भः प्रसिद्धलोकः। तत्राऽिरसाः हविष्मन्तः पितृरूपेण निवसन्ति। तैः सर्वे क्षत्रियाणां पितरः। ये क्षत्रियाः श्रद्धया श्राद्धंकुर्वन्ति तेऽत्र समायन्ति।

कामधुक–लोकसुस्वधानामकाः पितरः निवसन्ति। वैश्याः तेषां तर्पणं कुर्वन्ति। एकाष्टकाः पितरस्सन्ति। चतुर्थाः पितरस्सन्ति ‘‘सोमपाः’’(सोमं पिबन्ति एते)

**अत्र श्राद्धविधिः विविच्यते।**

सर्वेषां रजतं पात्रम् अथवा रजतन्वितं भवति। दत्तं स्वधा पुरोधाय सर्वदा पितृन् प्रीणाति। अग्निषोयमानां तु आप्यायनं कार्यं बुधः क्रियते। अग्नेः अभावे सति विप्रस्य पाणौ अपि अथवा दद्यात् जले। गोष्ठे सलिलान्तिके च पितृणां वासांसि धनं दक्षिणा दिक् प्रशस्यते। प्राचीनातम्, उदकं, तिलाः, सव्या≥गम् एवं दर्भाः, मांसं, (अत्र फलरसत्वम) पाठीनं, गोक्षीरं, मधुराश्च रसाः, खड्गाः लोहमिषमधुकुशश्यामका– शालयः यवनीवारमुद्गष्वे इक्षु–

शुक्लपुष्प –घृतानि –एतानि पितृणां प्रियद्रव्याणि प्रचछान्ते। इदानीं पितृणाम् अप्रियाणि द्रव्याणि समुच्यन्ते।

मशूरशणनिष्पावराजभाषकुसुम्भिका।
पद्मब्लिार्कधत्तूरपरिभद्राटरुषका:।।[4]

एते पदार्था: पितृभ्य: न देया:। पयश्चजाविकं तथा को द्रवोदाचारणका: कपित्थं मधुकातसा अपि अदेयानि।

**पितृकार्यमाहात्म्यम्–वंशवर्णनञ्च –**

यथा मत्स्ये –

पितृणां स्वभाव सामर्थ्यादिवर्णनं वर्तते। यथा हि ––

देवकार्यादपि पुन: पितृकार्यं विशिष्यते।
देवतानां चाप्तिी: पूर्वमाच्यायनं स्मृतम्।।

शीघ्रप्रसादास्त्वÿधा नि:शस्त्रा: स्थिरसौहार्दा:।
शान्तात्मान: सुखदा: पितर: पूर्वदेवता:।।

हविष्मतातधिपत्ये श्राद्धदव: स्मृतो रवि:।
एतत् व: सर्वमाख्यातं पितृवंशानुकीर्तनम्।
पुण्यं पवित्रमायुष्यं कीर्तनीयं सदा नृभि:।।[5]

**श्राद्धप्रकाराः –**

आवाहनादिरहितं नित्यतर्पणम् =अदैवम्।

त्रिपुरुषात्मकं श्राद्धं ''पार्वणम्'' इत्युच्यते, श्राद्धे विद्यातपोभिः विशिष्ट पवित्राणां ब्राह्मणानां समागमनेन एव पङ्क्तिः पवित्रा भवति च श्राद्धविधि फलाढयः ज्ञायते।

पिण्डान्वाहार्यकनामकः श्राद्धं सर्वथा अमावस्या पर्वणि भवतुमर्हति।

मत्स्ये सप्तदशेऽध्याये सम्पूर्णः श्राद्धविधिः विस्तारपूर्वकं विविच्यते भगवता व्यासेन। अत्र द्रव्यदिग्रहण–प्रदानकार्याणां विशेषाः मन्त्राश्चापि समुल्लिखितस्सन्ति। अपरं श्राद्धेषु समयस्थ विशेषानियमानिमपि महता विवेचनं वर्णितं खलु।

पौरोहित्यस्येदं प्रमुखमं मत्स्यपुराणे समुपकारकं वर्णितं वर्तते।

**षष्टिसंख्यकानि व्रतानि :———**

यजुर्वेदे निहितं यत्
वव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्।
दक्षिणाश्रश्रद्धामाप्नोति
श्र्श्रद्धया सत्यमाप्यते।। इति।

व्रतेन दीक्षाम् आप्नोति प्राप्नोति जन इति भावः। किं नाम व्रतम्। वृयते जीवनं प्रभोर्विविधाभिः समुपासनाभिः यत् तत् व्रतमित्युच्यते। व्रतेन जनः स्वेष्टसन्निधिं प्राप्नोतिश्वरसामीप्यमधिगच्छतीत्यर्थः श्रीमन्नमात्स्य भगवता व्यासेन विविधानि अतिमर्त्यानि शङ्कराणि षष्टिस्ंख्याकानि व्रतानि समुपद्दिष्टानि

सन्ति। तेषां सर्वेषां व्रतानां पृथक–पृथक विधयः विशद्तया समुपवर्णितान्यपि कर्मकाण्डविधिविधानां समुद्रवत् आसमन्तंवर्णनं कृतं विद्यते पुराणकतृणेति।

यथा हि ––

1. नक्षत्र–पुरुष व्रतविधि – तन्माहात्म्यम्
2. आदित्यशयन व्रतविधिः – तन्माहात्म्यम्
3. कृष्णाष्टमी व्रतविधिः – तन्माहात्म्यम्
4. रोहिणी चन्द्रशयनविधिः – तन्माहात्म्यम्
5. कूपतड़ागादिनिर्माणविधिः – तन्माहात्म्यम्
6. वृक्षारोपड़विधिः – तन्माहात्म्यम्
7. सौभाग्यशयनव्रतविधिः – तन्माहात्म्यम्
8. अर्घ्यप्रदानविधिः – तन्माहात्म्यम्
9. अनन्ततृतीयव्रतविधिः – तन्माहात्म्यम्
10. रसकल्याणनीविधिः – तन्माहात्म्यम्
11. आर्द्रानन्दकरी तृतीयविधिः – तन्माहात्म्यम्
12. अक्षयतृतीयाव्रतविधिः – तन्माहात्म्यम्
13. सारस्वतव्रतविधिः – तन्माहात्म्यम्
14. ग्रहणकाल स्नानजपविधिः – तन्माहात्म्यम्
15. सप्तमीस्न्रयनविधिः – तन्माहात्म्यम्
16. भीमद्वादशीविधिः – तन्माहात्म्यम्
17. पण्यस्त्री व्रतविधिः – तन्माहात्म्यम्
18. अशून्यशयन (द्वितीया) व्रतविधिः – तन्माहात्म्यम्
19. अँकारकव्रतविधिः – तन्माहात्म्यम्
20. शुक्र–गुरु पूजाविधिः – तन्माहात्म्यम्
21. कल्याणसप्तमीविधिः – तन्माहात्म्यम्
22. विशोकसप्तमीविधिः – तन्माहात्म्यम्

23. फलसप्तमीव्रतविधिः – तन्माहात्म्यम्
24. शर्करासप्तमीव्रतविधिः – तन्माहात्म्यम्
25. कमलसप्तमीव्रतविधिः – तन्माहात्म्यम्
26. मन्दारसप्तमीव्रतविधिः – तन्माहात्म्यम्
27. शुभसप्तमीव्रतविधिः – तन्माहात्म्यम्
28. विशोकसप्तमीव्रतविधिः – तन्माहात्म्यम्
29. गुड़धनुदानविधिः – तन्माहात्म्यम्
30. धान्यशैलदानविधिः – तन्माहात्म्यम्
31. लवणचलदानविधिः – तन्माहात्म्यम्
32. सुवर्णाचलदानविधिः – तन्माहात्म्यम्
33. तिल शैलदानविधिः– तन्माहात्म्यम्
34. कार्पासाचलदानविधिः – तन्माहात्म्यम्
35. घृताचलदानविधिः – तन्माहात्म्यम्
36. रत्नाचलदानविधिः – तन्माहात्म्यम्
37. रजताचलदानविधिः – तन्माहात्म्यम्
38. शर्कराचलदानविधिः – तन्माहात्म्यम्
39. शान्तिक–पौष्टिक कर्मविधिः तन्माहात्म्यम्
40. माहेश्वरव्रतविधिः तन्माहात्म्यम्
41. सर्वफलत्यागविधिः तन्माहात्म्यम्
42. आदित्यवारकल्पनाविधानम् तन्माहात्म्यम्
43. संक्रान्तिव्रतविधिः तन्माहात्म्यम्
44. विभूतिद्वादशीविधिः तन्माहात्म्यम्
45. स्नानविधिश्च षष्टिव्रतविधानञ्च तद्माहात्म्यम्।

**सान्ध्योपासनाविधिः –**

सन्ध्या नाम सम्यक् ध्यातेऽनया चा सा सन्ध्या ब्राह्मणां प्रथमं धर्म्यं पुरोहितानां पोराहित्यम् एव सन्ध्या। सन्ध्योपासनया रहितो विप्रः त्रिदिवसं सन्ध्याम् अकृत्वा शूद्रः वा पतितो भवति–इति ।

सन्ध्याप्रयोगः सम्यक् पुराणेषु ज्ञायते प्राप्यते वा। प्रयोगोऽयं सर्वाप्तः। नारदपुराणे गायत्री–सावित्री–सरस्वती देवतानां विशेषस्वरूपं विवेचितम् अस्ति। यथा ––

**गायत्रीस्वरूपम् –**

ब्रह्मणी चतुराननाक्षवलयं कुम्भं करैः स्रुक्सुतौ
विभ्राणा त्वरूणेन्द्रुकान्तिवदना ऋग्रूपिणी बालिका।
हंसारोहण केलिखणखण्मणेर्बिम्बार्चिता भूशिता
गायत्री परिभाविता भवतु नः सम्यत्समृद्धयै सदा।।[6]

**सावित्रीस्वरूपम् –**

रुद्राणी नवयौवना त्रिनयना वैयाघ्रमचर्माम्बरा
खट्वा्गत्रिशिखाक्षसूत्रवलयाऽऽभीतिः श्रियै चास्तु नः।
विद्युद्दामजटाकलापपविलसद्बालेन्दु मौलिर्मुदा
सावित्री वृषवाहना सिततनुर्ध्येया यजूरूपिणी।।[7]

**सरस्वतीस्वरूपम् –**

ध्येया सा च सरस्वती भगवती पीताम्बालंकृता
श्यामा श्यामतनुर्धरा परिलसद् गात्राञ्चिता वैष्णवी।
तर्क्ष्यस्था मणिभूपुरौंदलसद् ग्रैवेयभूषोज्जवला

हस्तालकृतशंखचक्रसुगदापद्मा श्रियै चास्तु नः।।[8]

इत्थम्भूतमतीवमहत्वपूर्णं सन्ध्योपासनञ्चापरं देवयज्ञ–भूतयज्ञ – पितृयज्ञ –मनुष्ययज्ञ– ब्रह्मयज्ञाश्च पञ्च एवञ्च श्राद्धादिकं विधिविधानं पुराणेषु पौरोहित्यसमृद्धिकरं वर्णितं न संशयः।

**विधिषु पूजनमहत्वम् :———**

नारायणपरा वेदाः नारायणपराः मखाः।
नारायणपराः क्रियाः नारायणपरं जगत्।।[9]

कस्यापि पौरोहित्यविधेः प्रमुख्यः नारायणोऽस्ति यत्कृपा प्राप्तिरेव कस्यापि विधः प्रमुखं फलं विद्यते। अत्र नारायणोपासना एव मुख्या वर्तते। जीवनपद्धतिरत्र यज्ञात्मिका वर्ण्यते।

यस्तु रोगादिनिर्मुक्तो ह्यनुतापसमन्वितः।
सर्वभूतदयायुक्तो विष्णुस्मरणतत्परः।
महापातक युक्तौ वा मुक्तौ वा सर्वपातकैः।।

विमुक्त एव पापेभ्या ज्ञेया विष्णुपरो यतः।
नारायणमनाद्यन्तं विश्वाकारमनमयम्।।

यस्तु संस्मरते मर्त्यः स मुक्तः पापकोटिभिः।
स्मृतो वा पूजितो वापि ध्यातः प्रणमितोऽपि वा।।

नाशयत्यव पापानि विष्णुर्हृद्गमनः सताम्।
सम्पर्काद्यादि वा मोहाद्यस्तु पूजयत हरिम्।।

सर्वपायविनिर्मुक्तः स प्रयाति हरेः पदम्।
सकृत्संस्मरणाविष्णोर्नश्यन्ति क्लेशसंचयाः।।

स्वर्गादिभ्रेप्राप्तिस्तु तस्य विप्रानुमीयते।
मानुषं दुर्लभं जन्म प्राप्यते यैर्मुनीश्वर।।

तत्रापि हरिभक्तिस्तु दुर्लुभा परिकीर्तिता।
तस्माताडिल्लतालोलं मानुष्यं प्राप्यं दुर्लभम्।।

हरिं सम्पूज्येद् भक्त्या पशुपाशविमोचनम्।
सर्वेΣन्तराया नश्यन्ति मनः शुद्धिश्च जायते।।
परं मोक्षं लभेच्चैव पूजिते तु जनार्दने [10]

**हरिपूजामहत्त्वम् –**

हरिपूजांपराणां तु सिद्धयन्ति नात्र संशयः सर्वतीर्थानि विविधाः यज्ञाः सौः सरहस्याः वदाः नारायणस्य अर्चनस्य एते कलां नार्हन्ति षोडशीम् इति।

**कर्मकाण्डक्षेत्राणि :–**

अत्रैकं विवेचनं विविच्यतेऽस्माभिः। विधयः कामसिद्धितरः भवत्येव, परन्तु केषाञ्चित् काम्यकर्मणा निश्चितानि स्थानानि सन्ति, यथा गयाक्षेत्रे मात्रश्राद्धम् भवति, नर्मदातटे शिवोपासना भवति इत्यादिकं सुप्रसिद्धं। मार्कण्डेयपुराणे कर्मकाण्डस्य विविधविधानानां तीर्थानाम् क्षेत्राणि[11] प्रकल्पतानि सन्ति।

अत्र तानि क्षेत्राणि केवलं स्मर्तव्यानि भवन्ति।

1. एकाम्रक्षेत्रम्
2. पुरुषोत्तमक्षेत्रम्

3. दशाश्वमेधिकतीर्थम्
4. वाराहतीर्थम्
5. कुशावर्ततीर्थम्
6. नीलगंगा
7. कपोततीर्थम्
8. पैशाचतीर्थम्
9. क्षुधातीर्थम्
10. अहल्या–सङ्गतीर्थम्
11. अश्वतीर्थम्
12. भानुतीर्थम्
13. अरुणा–वरुणा सङ्गमतीर्थम्
14. गारुड़तीर्थम्
15. गोवर्धनतीर्थम्
16. श्वेततीर्थम्
17. शुक्रतीर्थम्
18. इन्द्रतीर्थम्
19. पौलस्त्यतीर्थम्
20. अग्नितीर्थम्
21. ऋणमोचनतीर्थम्
22. सुपर्णास›म :
23. पुरुरवस्तीर्थम्
24. प×चतीर्थम्
25. शमीतीर्थम्
26. सोमतीर्थम्
27. वृद्धासङ्गमः

28. इलातीर्थम्
29. चक्रतीर्थम्
30. पिप्पलतीर्थम्
31. नागतीर्थम्
32. मातृतीर्थम्
33. अविघ्नतीर्थम्
34. शेषतीर्थम्
35. शनैश्चरतीर्थम्
36. विदर्भा स›गम्
37. रेवती–स›गम्
38. पूर्णातीर्थम्
39. रामतीर्थम्
40. पुत्रतीर्थम्
41. यमतीर्थम्
42. आग्नेयतीर्थम्
43. कपोततीर्थम्
44. उलूकतीर्थम्
45. तपस्तीर्थम्
46. इन्द्रतीर्थम्
47. वृषाकतीर्थम्
48. अब्जतीर्थम्
49. आपस्तम्बतीर्थम्
50. शुक्लतीर्थम्
51. विष्णुतीर्थम्
52. लक्ष्मीतीर्थम्
53. भानुतीर्थम्

54. खड्गतीर्थम्
55. आत्रेयतीर्थम्
56. परुष्णीतीर्थम्
57. नारसिंहतीर्थम्
58. पैशाचनतीर्थम्
59. निम्नभेदतीर्थम्
60. शंखहृदतीर्थम्
61. किष्किन्धातीर्थम्
62. व्यासतीर्थम्
63. कुशतर्पणतीर्थम्
64. प्रणीता–सङ्गमः
65. सारस्वतीतीर्थम्
66. चिच्चकतीर्थम्
67. भद्रतीर्थम्
68. पतत्रितीर्थम्
69. विप्रतीर्थम्
70. चक्षुस्तीर्थम्
71. सामुद्र–ऋषिसत्रतीर्थम्

इमानि सर्वाणि तीर्थानि ऋषिभिः वा ऋषीणां कर्मक्षेत्रे सन्ति। कर्मकाण्डविधानानां विशेषफलप्राप्तये सर्वाणि क्षेत्राणि यथाकाले समुपयोगानि च शङ्कराणि–मङ्गलमयानि सन्ति।

**दानविधिः –**

दातव्यमिति यद्दानं दीयतेऽनुपकारिणा।
देशे काले च पात्रे च तद्दानं सात्विकं विदुः।।

दानं त्रिधा– तापसं, राजसं, सात्विकञ्चेति श्रीमद्भगवद्गीतायां समुटङ्कितमस्ति। दानेन जनाः इह कीर्तिं वर्द्धयन्ति। अपरे च लोके स्वर्गसुखं भुङ्क्ते दानेन न शोभते।

यथा हि समुक्तं यत् ––––

दानेन पाणिर्नतु कङ्कणेन
स्नानेन शुद्धिर्न तु चन्दनेन।
ज्ञानेन मुक्तिः न तु मुण्डनेन
मानेन कीर्तिः न तु मत्सरेण।।[12]

अत्र अस्य हेतोः कथनमिदमेव अस्ति यत् दानस्य महिमा सर्वत्र यत्र–तत्र गीयते। दानस्य पुण्यं महत् अपि तु दानस्य विधिस्मारकं पुराणेषु एव ससन्तोषं वर्णयते नान्यत्र।

षोडशदानानि प्रशस्तानि कथितानि सन्ति तेषां दानानां महिमावर्णनं, विधिवर्णनं तथा विधिदानस्य कालः पद्धतिः सर्वमेतत् पुराणेषु लिखितम्।

तुलादानम् हिरण्यगर्भदानम्,
ब्राह्मण्डदानम्, कल्पपादयदानम्,
गोसहस्रदानम्, हेमहस्तिरथदानम्,

| | |
|---|---|
| हलदानम्, | विश्वचक्रदानम्, |
| कनक–कल्पलता दानम्, | सप्त–सागरदानम्, |
| रत्नधेनुदानम्, | महाभूत–घटदानम्। |
| सर्वाण्यपरयुक्तानि दानानि, | दानमाहात्म्यानि, |

दानप्रसङ्गः प्रभृतीनां रसमयं वर्णनं पुराणेष्वेव। कर्मकाण्डस्य एकम् अभिन्नं महत्वपूर्णम् अङ्गं दानमस्ति। दानस्य महत्वपूर्णो विधिः दानद्रव्यानु –सारेण यथाशास्त्रं यथाकालं प्रयञ्चितमस्ति भगवता बादरायणेन।

**वास्तुविधिः ———**

वास्तुपुरुष देवेश भूशय्याविरत प्रभो।
मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा।।

अनेन प्रकारेण याजकाः स्वगृहे सर्वसुखोपलब्धे मुहुः यजन्ति प्रार्थयन्ति च। श्रीमन्मत्स्ये वास्तुविधान प्रकाराः भेदाः पूजनविधयः 168 तः 170 अध्यायेषु सविस्तरम् वर्णितासन्ति।

वास्तु–शान्तिविधानं,
प्रासादभेदाः
प्रासादनिर्माणविधिः,
प्रासादसंलग्नमण्डपनामानि
प्रसादस्वरूपं, स्वरूपभेदाः,

मण्डपनिर्माणविधिः, सर्वमेतत् विस्तरेण समन्त्रकं निर्दिष्टमस्ति पुराणकारणेति महदुपकारकं शास्त्र अस्माकं कृते वास्तुविषय मार्गदर्शनं भवति। एतद् विहाय ——

1. वास्तु प्रादुर्भावकथा
2. वास्तुचक्र वर्णनम्
3. राजप्रासादनिर्माणविधिः

4. वेधविवरणम्
5. गृह–निर्माणविधिः
6. ग्राह्य काष्ठवर्णनम्
7. देवप्रतिम प्रमाणम्
8. प्रतिमालक्षणानि
9. विविधदेवतानां प्रतिमावर्णनम्

इत्थम्भूतः सर्वविषयाः वास्तुप्रकरणेऽस्मिन् दशाविधिकेषु प्रकरणेषु सविस्तार वर्णिताः प्राप्यन्ते।

**वास्तुपूजनविधिः———**

ॐ अद्य शुभगुणविशिष्टायां पुण्यतिथौ गृहप्रतिष्ठा›भूतवास्तुपूजनं सकलकर्म समृध्यर्थमीशानादिरुद्रदास –पर्यन्तानां पच्चत्वारिंशत वास्तुदेवतानां पूजनमहं करिष्ये।

ततः चन्दनं पुष्पं च गृहीत्वा ईशानादिरुद्रदासपर्यन्तानां इदमावहनं, इत्यावाह्य अत्रागच्छन्तु वरदा भवन्तु पच्चत्वारिंशदेवताभ्य इदमासनम्। एवं पाद्यार्घाचमनीयपच्चत्वारिंशद्देव –ताभ्यो नमः। दध्योदनेन बलिदानम्।

ॐ ईशानाय नमः पूजानैवेद्यं दध्योदनं च ईशनाय स्वाहा।

ॐ पर्जन्याय नमः पूजानैवेद्यं दध्योदपनं पर्ज्जन्याय स्वाहा। एवं जयन्ताय पीतध्वजाय ॐ इन्द्राय नमः। पूजनैवेद्यं दध्योदनं च इन्द्राय स्वाहा। ॐ सूर्याय. ॐ सत्याय. ॐ भृशाय. ॐ अन्तरिक्षाय. ॐ वायवे. ॐ पूष्णे. ॐ वितथाय. ॐ गृहक्षेत्राय. ॐ यमाय. ॐ गन्धर्वाय. ॐ भृङ्गराजाय. ॐ मृगाय. ॐ पितृगणाय. ॐ दौवारिकाय. ॐ सुग्रीवाय. ॐ पुष्पदन्ताय.

ॐ वरुणाय. ॐ असुराय. ॐ शेषाय. ॐ पापयक्ष्मणे. ॐ रोगाय. ॐ नागाय. ॐ उरव्याय. ॐ भल्लटाय. ॐ सोमाय. ॐ भुजङ्गपतये. ॐ आदितये. ॐ दित्तये.।

कोणेषु ब्रह्मणे, अर्यम्णे, विवस्वते, मित्राय। ततो मध्यत् पृथ्वीधराय, आपाय, आपवत्साय, सवित्रे, सावित्राय, जयन्ताय, विबुधाधिपाय रुद्राय। रुद्रदासाय। वास्तुप्रीतये धेनुदानं। उमामहेश्वरदानं च। ॐ उमा माहेश्वराभ्यां नमः। सप्तधान्यदानम्।

पूजितोऽसि मया वास्तो हेमाद्यैरर्चनैः शुभैः।
प्रसीद याहि विश्वेश देहि में गृहजं सुखम्।।

इति प्रार्थना।

ततः प्रविश्य गृहाभ्यन्तरे निधिशालायां दक्षिणकोणे श्रियं संस्थाप्य

ॐ अद्य पूर्वोक्तगुणविशिष्टायां तिथौ वास्तुपूजनगृहप्रवेशाद्यऽभूत–श्रीस्थापनादि कर्माहं करिष्ये।

आवाहनादिपूर्ववत्। आरार्तिकं पञ्चामृतं नैवेद्यं एकस्मिन् पात्रे धान्यं सर्षपरजतान्वितं दूर्वाक्षतगंधपुष्पादिकं सम्भारं कृत्वा स्वस्तिवाचनं कुर्यात्।

ॐ स्थिरो भव वीड्व› आशुर्भव वाज्यर्वन् पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहनः।

इति मन्त्रेण गर्त्तमध्ये स्थाप्य तदुपरि मृत्तिकां दधात्। स्वस्तिकं लिखेत्। ततः सूत्रवेष्टित उदुम्बरपात्राणि सक्षीराणि दूर्वागोमयदधिमधुघृत –

कुशान यवौश्च सर्वान् कांस्यपात्रे संभारन कृत्वा उदकसहितं भाण्डैक्यं कृत्वा पूर्वादिक्रमेण अभिषेकं गृहमध्ये आसनोपस्थाने प्रोक्षणं कुर्यात्।

**गृहशेषवास्तुपूजाः–**

दक्षिणद्वारे धात्रे नमः वामद्वारे विधात्रे नमः। गणेशाय नमः। श्रिये नमः। पट्टशालायै नमः। मण्डपदेवताभ्यो नमः। कण्डनीभ्यो नमः। पेषिण्यै नमः।

**पश्चाच्चुह्यादिवलितदानमुक्तमन्त्रैः–**

ॐ धर्माय नमः इतिचुह्यानदक्षिणबाहौ। पुनः धर्माय नमः वामवाहौ।
ॐ स्वरस्वरपरिवर्तनीयाय नमः। किं धान्यादि भाण्डेषु।
ॐ जलामृताय वरुणाय नमः जलभाण्डेषु।
ॐ महाविघ्नराजाय नमः गृहप्रधानद्वारे।।
ॐ महाशुभांगाय नमः पेषिण्याम्।
ॐ रुद्रकोटिगिरिण्यै नमः इत्युलूखले।
ॐ बलभद्रप्रियाय प्रहरणाय नमः इति मुशले।
ॐ मृत्यवे देवीचोदिते नमः इति संमार्जन्याम्।
ॐ कामार्थकुसुमायुधाय नमः इति शयनीय–शिरसि।

ॐ स्कन्दाय गृहाधिपतये नमः चतुष्पदशालायाम्, गवादिषु निष्टारके मूत्रपुरीषं तत्र स्थले बलिदानं मार्गे–मार्गे–देवताभ्यो नमः। इत्यादि मन्त्र क्रम–निरूपणमस्ति। क्रमोऽयं

वैदिककर्मकाण्डविधानेऽतीव –महत्वपमर्णः।

ॐ नमः'' इति मन्त्रेण परमात्मनः स्मरणं कर्तव्यम्।
''यं रं वं लम्'' इति बीजैः शरीरशोधनं कर्तव्यम्।
'' ॐ नमः'' मन्त्रेणात्मस्वरूपं ब्रह्मस्वरूपं मन्तव्यम्।

अनन्तरं योगपीठपूजनविधानमस्ति। ॐ अनन्ताय नमः। इत्यादिभिः नाममन्त्रैश्च। अनन्तरं प्रभोरायुधतमक्रियां क्रियते। अनन्तरमधोयुक्तान् मन्त्राण पठेत् तान् प्रणमेत्।

'' ॐ नमो भगवत वासुदेवाय'' (प्रत्येकाक्षरान् अभिवन्देत)

द्वादशाक्षरमन्त्रः।

दशाक्षरमन्त्रः।

अष्टाक्षरमन्त्रः। मन्त्रद्वयं स्मारं –स्मारं पुण्डरीकाद्वामभिवन्देत्।

नमस्ते पुण्डरीकाक्ष नमस्त विधीवन्।
सुब्रह्य नमस्तेऽस्तु महापुरुष पूर्वज।।

अनन्तरं महापुरुषविद्यां पठेत्। जलाभ्युक्षणं क्रियते। द्वादशाक्षरमन्त्रहोमच्च कृत्वा दिक्पालेभ्यः सकृदाहूतिदानं दीयते। एकाग्रचित्तेन पूर्णाहुतिं प्रदीयत्।

विसर्जनं क्रियेत् – गच्छ गच्छेति।

अन्ते चक्रादिपूजनं क्रियेत्।

ॐ चक्राय स्वाहा।

ॐ सुचक्राय स्वाहा।

ॐ महाचक्राय स्वाहा।

ॐ असुरान्तकृत हुं फट्।

ॐ हुं सहस्रार हुं फट्।

उपर्यक्तैः मन्त्रैः कृता द्वारकाचक्रस्य अर्चना गृहस्य सर्वरक्षाकर्त्री चङ्गमैंलदायिनी प्रभवति।

**<u>शत्रुविजयविधिः –</u>**

शत्रुणां बलक्षयार्थम् अभिचारक्रियाः बहवः सन्ति।

व्यवहारेणैव श्रायन्ते मित्राणिरिपवस्तथा।
न कस्य कस्यचिन्मितं न कस्य कस्यचिद् रिपुः।।[13]

साहित्येऽस्मिन् शत्रुणां धर्मं विहाय सर्वैः सह आत्मभाव पूर्वकं बान्धवभावना एवं उपदिष्टा वर्तते तथाऽपि पुराणेषु शत्रुनाशार्थम् असंख्यविधयः सन्ति। गारुड़े तापयुतं इदं स्तोत्रं महत् कल्याणकारकं विद्यते।

प्रवक्ष्याम्यधुना ह्येतद्वैष्णवं पञ्चरं शुभम्।
नमो नमस्ते गाविन्द चक्रं गृह्य सुदर्शनम्।।
प्राच्यां रक्षस्व मां विष्णा त्वामहं शरणं गतः।
गदां कौमौदकीं गृह्य पद्मनाभ नमोऽस्तु ते।।[14]

इत्थं विष्णुपञ्जरस्तोत्रं स्वयं श्रीनारायणः शम्भवः प्रोवाच। इदं स्तवनं शत्रुविनाशकरं भजेतराम्। यथा हि देव्याः विशेषण उपासनाः भवन्ति, शत्रु विनाशहेतवे। दुर्गासप्तशतीमध्यायेऽपि इदमेव स्तवनं शत्रुबलरक्षयार्थं देव्याः वर्तते यत् ——

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम्।।[15] इति

परन्तु इदं विष्णुपञ्जरस्तोत्रं जगद्वितितमस्ति, स्वफलानुसारेणेति दिक्।

**विवाहविधिनियमाः ———**

अस्माकं कर्मकाण्डस्य आधारस्तम्भस्वरूपाः षोडश संस्कारास्सन्ति। तेष्वपि विवाहसंस्कारः मुख्यतमः च महत्वपूर्णः प्रचक्षते।

मनुमहाराजेनोक्तं यत् ———

'' यथा वायुं समाश्रित्य जीवन्ति सर्वजन्तवः।
तथा गृहस्थमाश्रित्य आजीवन्ति सर्वाश्रमः।।[16]

विवाहस्य अष्टौ प्रकारसन्ति। अत्र प्रथमविधरेभावे सति द्वितीयो विधिः कर्तव्यः। द्वितीयाभावे तृतीयो विधिः भवितुम् अर्हति। विवाहस्याष्टौ प्रकाराः यथा हि ——

| क्रम | विवाहप्रकाराः |
|---|---|
| 1 | ब्राह्मविवाहः |
| 2 | .दैवविधिविवाहः |
| 3 | आर्षविधिविवाहः |
| 4 | प्रजापत्यविधिविवाहः |
| 5 | आसुरविधिविवाहः |
| 6 | गान्धर्वविधिविवाहः |
| 7 | राक्षसविधिविवाहः |
| 8 | पैशाचविधिविवाहः |

अत्र पद्धतेः पृथकभावात् विवाहभिन्नत्वमपेक्षते। एवं विवाहविधिं विहायान्येषां संस्कारणामपि वर्णनं पुराणेषु अधिकं वर्तते।

**प्रकीर्णकर्मकाण्डविधयः –**

नारदपुराणं पादपञ्चकं विर्भति। नारदीयचक्रेऽपि विधि विषयकं ज्ञानं बहुमार्गीयं प्रपञ्चितम्। वयमन्त्रातिसंक्षेपे शोधसारे महत्वपूर्णस्य नारदपुराणस्य पौराहित्यविषयकं वर्णनमविस्मृत्वा करिष्यामः।

**दुःखनिवारणविधिः –**

मार्गशीर्षमासे शुक्लपक्षस्य दशमीतः प्रारभ्य शुद्धो भूत्वा एकादश्याञ्च नारायणं सर्वताभावेन पूजयित्वा एवं मन्त्रं जपेत्।

नमस्ते ज्ञानरूपाय ज्ञानदाय नमोऽस्तु ते।
नमस्ते सर्वरूपाय सर्वसिद्धिप्रदायिने।।

इति प्रार्थयित्वा पञ्चरात्रात्मकं व्रतं पूर्वमेव श्रीहरये सर्मपयेत् ––

पञ्चरात्रं निराहारो ह्याद्यप्रीीृति केशव।

त्वदाज्ञय जगत्स्वामिन् ममाभीष्टप्रदो भव।।

एकादशीतः पूर्णिमाप्रभृतिदिवसयोः रात्रिद्वयस्य जागरणं कर्तव्यम्, पूर्णिमानन्तरं दुग्धेन अभिषिंच्य विष्णुं तिलहोमेन संतुष्टः कर्तव्यः। व्रतमिदं संवतसरपर्यन्तं कर्तव्यम्। तदनन्तरं विधि दानद्रव्यं दधात् ब्राह्मणाय। ब्राह्मणमनेन स्तवेन प्रार्थयेत् ––

सर्वात्मन् सर्वभूतेश सर्वव्यापिन् सनातन्।
परमानन्प्रदानेन सुप्रीतो भव माधव।।

अनेन व्रतेन सर्वाणि दुःखानि, आपद्दावानलं तरति भक्तश्च नूनं विष्णुप्रसादं सम्प्राप्य परं ब्रह्मधिगच्छति अस्य व्रतस्य श्रवणमपि यः करोति सः महाघोरपातकेभ्यः शीघ्रमेव विमुक्तो भवति–इति अतीव गोपनीयं व्रतं नारद वर्णितं।

**<u>धनप्राप्तिविधिः –</u>**

प्रायः कर्मणः द्वौ विभागौ वर्तते।

1. नित्य–नैमित्तिक–काम्यकर्माणि च।
2. निषिद्ध कर्मणि।

कलिजाः मनुष्याः प्रायः काम्यकर्माण्युपासन्ते। अत्र पाठात्मकेन यज्ञेन सूर्याराधना भवति, तया जनः सर्वथा सर्वं लभते। अत्रेदं महागोपनीयं स्तोत्रं विविच्यते यत् सर्वभ्यः प्रदातुमशक्यमस्ति तस्माद्धेताः अत्र न प्रदीयते, परन्तु तत् वर्तते मार्कण्डेयपुराणेऽस्ति।

मार्कण्डेयपुराणे सूर्यनामानि।
भागवते महिषीगीतम्।
विष्णुपुराणे विष्णुस्तोत्राणि।

महाभारते विष्णुसहस्रनामस्तोत्रम्।
वामनाप्रकथनश्रवणम्।

मार्कण्डेय पुराणे तीर्थक्षेत्राणा नामपरिचयः प्राप्तः। अत्र मत्स्यपुराणेऽपि नर्मदा–काशी–कावेरी–शुक्लतीर्थ प्रभृतीनां तीर्थानां वर्णनं विस्तृतं प्राप्यते।

**ग्रहयागविधानम् :–––**

ग्रहाः राज्यं प्रयच्छन्ति ग्रहाः राज्यं हरन्ति च।
ग्रहैश्च व्यापितं सर्वं त्रैलाक्यं सचराचरम्।।

इत्थम्भूतानां ग्रहाणां सर्वसत्ताभूतानां देवतानां वर्णनं वयं ज्योतिषप्रकरणान्तर्गत करिष्यामः परन्तु ग्रहशन्तिहेतव यत् यजनादिकं भवति तत् तु कर्मकाण्डविधिना एव भवति वा भवितुम् अर्हति। अतो हेतोरत्र ग्रहाणां शान्तिकर्म वर्ण्यते कर्मकाण्डस्य महत्वपूर्णज्ञानस्वरूपमिति ––

**महत्वम् ––**

ग्रहयज्ञः सदा कार्योलक्षणहोमसमन्वितः।
नदीनां सङ्गमे चैवसुराणामग्रतस्तथा।।

**क्षेत्राणि ––**

सुसमे भूमिभागे च दैवज्ञाधिष्ठितो नृपः।
गुरुणा चैव ऋत्विग्भिः सार्धं भूमिं परीक्षयेत्।।

**कुण्डप्रमाणम् –––**

खनेत् कुण्डं च तत्रैव सुसमं हस्तमात्रकम्।
द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणम्।।

**ब्राह्मणवृत्तिः ——**

युग्मास्तु ऋत्विजः प्रोक्ता अष्टौ वै वेदपारगाः।
कन्दमूलफलाहाराः दधिक्षीररशिनोऽपि वा।।

**होमविधिः ——**

वैद्यां निधायप्येच्चैव रत्नानि विविधानि च। सिक्तापरिवेषाः ततवन्हिं समिन्धयेत् तदन्नतरं गायत्र्या 10,000 आहूतयः। मानस्ताकनेति मन्त्रेण 6000 आहूतयः। ग्रहाणां मन्त्रैः 30,000 आहूतयः। विष्णुसूक्तेन 4000 आहूतयः, कुष्माण्डैः 5000 कुसुमादिभिः 16000 आहूतयः दातव्या भवन्ति ग्रहयोगेऽस्मिन्।

अत्र लक्षकोट्यादिभिः होमप्रकाराः भवन्ति। सांख्यानुसारेण संख्यात्मकाः निर्धारित आहूतयः प्रदीयन्ते।

**यजमाननियमाः ————**

यजमानः प्योभक्षी फलाशी च तथानद्य।
यवादिव्रीहयो माषास्तिलाश्च सह सर्षपैः।।

**स्थानानि ——**

गङ्गातटे यमुनातटे वा सरस्वतीस›मे च नारेश्वरतीर्थ नर्मदादेविकायास्तट होमो विधीयते।

**मासाः ——**

ग्रहयागः चैत्रे वा विशेषतः कार्तिकेऽतिफलदायको भवति।

अनेन प्रकारेण ग्रहश्रसान्नतार्थं यागत्रयं भवति। सहस्र यागः लक्षहोमयागः च कोटिहोमः विष्णुरेव यज्ञपूज्यः अस्य फलमपि महन्निर्दिष्टमस्ति।

सर्वतीर्थेषु यत् स्नानं सर्वयज्ञेषु यत्फलम्। तत्फलं समवाप्नाति कृत्वा यज्ञत्रयं नृप।।

# सन्दर्भ–ग्रन्थ सूची


1. पाणिनि सूत्र
2. श्रीमद्भागवत् माहात्म्य
3. श्रीमद् भागावत् 20–23–9
4. मत्स्यपुराण – 16–37
5. मत्स्यपुराण 16/40 तः 43
6. नारदपुराण –27/55
7. नारदपुराण
8. नारदपुराण
9. श्रीमद्भागवत
10. नारदपुराण 30/92/202
11. मा.पु.
12. सुभाषितावल्यम्
13. सुभाषित भाण्डागार
14. गरुणपुराण
15. दुर्गासप्तशती
16. मनुस्मृतिः